# shRRigAlagItA

# શ઼ૃગાલગીતા

## Document Information

Text title : shRRigAlagItA

File name : shRRigAlagItA.itx

Category : gItA, giitaa

Location : doc_giitaa

Description-comments : adhyAya 180/178

Source : Mahabharata, Shantiparva, Mokshadharmaparva, shRigAla-kashyapa saMvAda

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# શ્ૃગાલગીતા

ભીષ્મેણ યુધિષ્ઠિરમ્પ્રતિ ઇતરનિપેધપૂર્વકં પ્રજ્ઞાયાઃ
સુખસાધનતાયાં પ્રમાણતયા સૃગાલકાશ્યપસંવાદાનુવાદઃ ॥ ૧॥

યુધિષ્ઠિર ઉવાચ । ૦
બાન્ધવાઃ કર્મ વિત્તં વા પ્રજ્ઞા વેહ પિતામહ ।
નરસ્ય કા પ્રતિષ્ઠા સ્યાદેતત્પૃષ્ટો વદસ્વ મે ॥ ૧॥

ભીષ્મ ઉવાચ । ૨
પ્રજ્ઞા પ્રતિષ્ઠા ભૂતાનાં પ્રજ્ઞા લાભઃ પરો મતઃ ।
પ્રજ્ઞા નિઃશ્રેયસી લોકે પ્રજ્ઞા સ્વર્ગો મતઃ સતામ્ ॥ ૨॥

પ્રજ્ઞયા પ્રાપિતાર્થો હિ બલિરૈશ્વર્યસઙ્ક્ષયે ।
પ્રહ્લાદો નમુચિર્મઙ્કિસ્તસ્યાઃ કિં વિદ્યતે પરમ્ ॥ ૩॥

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
ઇન્દ્રકાશ્યપસંવાદં તન્નિબોધ યુધિષ્ઠિર ॥ ૪॥

વૈશ્યઃ કશ્ચિદૃષિસુતં કાશ્યપં સંશિતવ્રતમ્ ।
રથેન પાતયામાસ શ્રીમાન્દૃપ્તસ્તપસ્વિનમ્ ॥ ૫॥

આર્તઃ સ પતિતઃ ક્રુદ્ધસ્ત્યક્ત્વાઽઽત્માનમથાબ્રવીત્ ।
મરિષ્યામ્યધનસ્યેહ જીવિતાર્થો ન વિદ્યતે ॥ ૬॥

તથા મુમૂર્ષમાસીનમકૂજન્તમચેતસમ્ ।
ઇન્દ્રઃ સૃગાલરૂપેણ બભાષે ક્ષુબ્ધમાનસમ્ ॥ ૭॥

મનુષ્યયોનિમિચ્છન્તિ સર્વભૂતાનિ સર્વશઃ ।
મનુષ્યત્વે ચ વિપ્રત્વં સર્વ એવાભિનન્દતિ ॥ ૮॥

મનુષ્યો બ્રાહ્મણશ્ચાસિ શ્રોત્રિયશ્ચાસિ કાશ્યપ ।
સુદુર્લભમવાપ્યૈતન્ન દોષાન્મર્તુમર્હસિ ॥ ૯॥

સર્વે લાભાઃ સાભિમાના ઇતિ સત્યવતી શ્રુતિઃ ।
સન્તોષણીયરૂપોઽસિ લોભાદ્યદભિમન્યસે ॥ ૧૦॥

અહો સિદ્ધાર્થતા તેષાં યેષાં સન્તીહ પાણયઃ ।
[અતીવ સ્પૃહયે તેષાં યેષાં સન્તીહ પાણયઃ ॥] ૧૧॥

પાણિમદ્ભ્યઃ સ્પૃહાઽસ્માકં યથા તવ ધનસ્ય વૈ ।
ન પાણિલાભાદધિકો લાભઃ કશ્ચન વિદ્યતે ॥ ૧૨॥

અપાણિત્વાદ્વયં બ્રહ્મન્કણ્ટકં નોદ્ધરામહે ।
જન્તૂનુચ્ચાવચાનઙ્ગે દશતો ન કષામ વા ॥ ૧૩॥

અથ યેષાં પુનઃ પાણી દેવદત્તૌ દશાઙ્ગુલી ।
ઉદ્ધરન્તિ કૃમીનઙ્ગાદ્દશતો નિકષન્તિ ચ ॥ ૧૪॥

વર્ષાહિમાતપાનાં ચ પરિત્રાણાનિ કુર્વતે ।
ચેલમન્નં સુખં શય્યાં નિવાતં ચોપભુઞ્જતે ॥ ૧૫॥

અધિષ્ઠાય ચ ગાં લોકે ભુઞ્જતે વાહયન્તિ ચ ।
ઉપાયૈર્બહુભિશ્ચૈવ વશ્યાનાત્મનિ કુર્વતે ॥ ૧૬॥

યે ખલ્વજિહ્વાઃ કૃપણા અલ્પપ્રાણા અપાણયઃ ।
સહન્તે તાનિ દુઃખાનિ દિષ્ટ્યા ત્વં ન તથા મુને ॥ ૧૭॥

દિષ્ટ્યા ત્વં ન શૃગાલો વૈ ન કૃમિર્ન ચ મૂષકઃ ।
ન સર્પો ન ચ મણ્ડૂકો ન ચાન્યઃ પાપયોનિજઃ ॥ ૧૮॥

એતાવતાઽપિ લાભેન તોષ્ટુમર્હસિ કાશ્યપ ।
કિં પુનર્યોઽસિ સત્વાનાં સર્વેષાં બ્રાહ્મણોત્તમઃ ॥ ૧૯॥

ઇમે માં કૃમયોઽદન્તિ યેષામુદ્ધરણાય વૈ ।
નાસ્તિ શક્તિરપાણિત્વાત્પશ્યાવસ્થામિમાં મમ ॥ ૨૦॥

અકાર્યમિતિ ચૈવેમં નાત્માનં સન્ત્યજામ્યહમ્ ।
નાતઃ પાપીયસીં યોનિં પતેયમપરામિતિ ॥ ૨૧॥

મધ્યે વૈ પાપયોનીનાં સૃગાલીયામહં ગતઃ ।
પાપીયસ્યો બહુતરા ઇતોઽન્યાઃ પાપયોનયઃ ॥ ૨૨॥

જાત્યૈવૈકે સુખિતરાઃ સન્ત્યન્યે ભૃશદુઃખિતાઃ ।
નૈકાન્તં સુખમેવેહ ક્વચિત્પશ્યામિ કસ્યચિત્ ॥ ૨૩॥

મનુષ્યા હ્યાઢ્યતાં પ્રાપ્ય રાજ્યમિચ્છન્ત્યનન્તરમ્ ।
રાજ્યાદ્દેવત્વમિચ્છન્તિ દેવત્વાદિન્દ્રતામપિ ॥ ૨૪॥

ભવેસ્ત્વં યદ્યપિ ત્વાઢ્યો ન રાજા ન ચ દૈવતમ્ ।
દેવત્વં પ્રાપ્ય ચેન્દ્રત્વં નૈવ તુષ્યેસ્તથા સતિ ॥ ૨૫॥

ન તૃપ્તિઃ પ્રિયલાભેઽસ્તિ તૃષ્ણા નાદ્ભિઃ પ્રશામ્યતિ ।
સમ્પ્રજ્વલતિ સા ભૂયઃ સમિદ્ભિરિવ પાવકઃ ॥ ૨૬॥

અસ્ત્યેવ ત્વયિ શોકોઽપિ હર્ષશ્ચાપિ તથા ત્વયિ ।
સુખદુઃખે તથા ચોભે તત્ર કા પરિદેવના ॥ ૨૭॥

પરિચ્છિદ્યૈવ કામાનાં સર્વેષાં ચૈવ કર્મણામ્ ।
મૂલં બુદ્ધીન્દ્રિયગ્રામં શકુન્તાનિવ પઞ્જરે ॥ ૨૮॥

ન દ્વિતીયસ્ય શિરસશ્છેદનં વિદ્યતે ક્વચિત્ ।
ન ચ પાણેસ્તૃતીયસ્ય યન્નાસ્તિ ન તતો ભયમ્ ॥ ૨૯॥

ન ખલ્વપ્યરસજ્ઞસ્ય કામઃ ક્વચન જાયતે ।
સંસ્પર્શાદ્દર્શનાદ્વાપિ શ્રવણાદ્વાપિ જાયતે ॥ ૩૦॥

ન ત્વં સ્મરસિ વારુણ્યા લટ્વાકાનાં ચ પક્ષિણામ્ ।
તાભ્યાં ચાભ્યધિકો ભક્ષ્યો ન કશ્ચિદ્વિદ્યતે ક્વચિત્ ॥ ૩૧॥

યાનિ ચાન્યાનિ ભૂતેષુ ભક્ષ્યભોજ્યાનિ કાશ્યપ ।
યેષામભુક્તપૂર્વાણિ તેષામસ્મૃતિરેવ તે ॥ ૩૨॥

અપ્રાશનમસંસ્પર્શમસન્દર્શનમેવ ચ ।
પુરુષસ્યૈષ નિયમો મન્યે શ્રેયો ન સંશયઃ ॥ ૩૩॥

પાણિમન્તો બલવન્તો ધનવન્તો ન સંશયઃ ।
મનુષ્યા માનુષૈરેવ દાસત્વમુપપાદિતાઃ ॥ ૩૪॥

વધબન્ધપરિક્લેશૈઃ ક્લિશ્યન્તે ચ પુનઃ પુનઃ ।
તે ખલ્વપિ રમન્તે ચ મોદન્તે ચ હસન્તિ ચ ॥ ૩૫॥

અપરે બાહુબલિનઃ કૃતવિદ્યા મનસ્વિનઃ ।
જુગુપ્સિતાં ચ કૃપણાં પાપવૃત્તિમુપાસતે ॥ ૩૬॥

ઉત્સહન્તે ચ તે વૃત્તિમન્યામપ્યુપસેવિતુમ્ ।

સ્વકર્મણા તુ નિયતં ભવિતવ્યં તુ તત્તથા ॥ ૩૭॥

ન પુલ્કસો ન ચણ્ડાલ આત્માનં ત્યક્તુમિચ્છતિ ।
તયા તુષ્ટઃ સ્વયા યોન્યા માયાં પશ્યસ્વ યાદૃશીમ્ ॥ ૩૮॥

દૃષ્ટ્વા કુણીન્પક્ષહતાન્મનુષ્યાનામયાવિનઃ ।
સુસમ્પૂર્ણઃ સ્વયા યોન્યા લબ્ધલાભોઽસિ કાશ્યપ ॥ ૩૯॥

યદિ બ્રાહ્મણદેહસ્તે નિરાતઙ્કો નિરામયઃ ।
અઙ્ગાનિ ચ સમગ્રાણિ ન ચ લોકેષુ ધિક્કૃતઃ ॥ ૪૦॥

ન કેનચિત્પ્રવાદેન સત્યેનૈવાપહારિણા ।
ધર્માયોત્તિષ્ઠ વિપ્રર્ષે નાત્માનં ત્યક્તુમર્હસિ ॥ ૪૧॥

યદિ બ્રહ્મઞ્શ ृણોષ્યેતચ્છ્રદ્દધાસિ ચ મે વચઃ ।
વેદોક્તસ્યૈવ ધર્મસ્ય ફલં મુખ્યમવાપ્સ્યસિ ॥ ૪૨॥

સ્વાધ્યાયમગ્નિસંસ્કારમપ્રમત્તોઽનુપાલય ।
સત્યં દમં ચ દાનં ચ સ્પર્ધિષ્ઠા મા ચ કેનચિત્ ॥ ૪૩॥

યે કેચન સ્વધ્યયનાઃ પ્રાપ્તા યજનયાજનમ્ ।
કથં તે ચાનુશોચેયુર્ધ્યાયેયુર્વાઽપ્યશોભનમ્ ॥ ૪૪॥

ઇચ્છન્તસ્તે વિહારાય સુખં મહદવાપ્નુયુઃ ।
યેઽનુજાતાઃ સુનક્ષત્રે સુતિથૌ સુમુહૂર્તકે ।
યજ્ઞદાનપ્રજેહાયાં યતન્તે શક્તિપૂર્વકમ્ ॥ ૪૫॥

નક્ષત્રેષ્વાસુરેષ્વન્યે દુસ્તિથૌ દુર્મુહૂર્તજાઃ ।
સમ્પતન્ત્યાસુરીં યોનિં યજ્ઞપ્રસવવર્જિતાઃ ॥ ૪૬॥

અહમાસં પણ્ડિતકો હૈતુકો વેદનિન્દકઃ ।
આન્વીક્ષિકીં તર્કવિદ્યામનુરક્તો નિરર્થિકામ્ ॥ ૪૭॥

હેતુવાદાન્પ્રવદિતા વક્તા સંસત્સુ હેતુમત્ ।
આક્રોષ્ટા ચાતિવક્તા ચ બ્રહ્મવાક્યેષુ ચ દ્વિજાન્ ॥ ૪૮॥

નાસ્તિકઃ સર્વશઙ્કી ચ મૂર્ખઃ પણ્ડિતમાનિકઃ ।
તસ્યેયં ફલનિર્વૃત્તિઃ સૃગાલત્વં મમ દ્વિજ ॥ ૪૯॥

અપિ જાતુ તથા તત્સ્યાદહોરાત્રશતૈરપિ ।
યદહં માનુષીં યોનિં સૃગાલઃ પ્રાપ્નુયાં પુનઃ ॥ ૫૦॥

સન્તુષ્ટશ્ચાપ્રમત્તશ્ચ યજ્ઞદાનતપોરતઃ ।
જ્ઞેયં જ્ઞાતા ભવેયં વૈ વર્જ્યં વર્જયિતા તથા ॥ ૫૧॥

ભીષ્મ ઉવાચ । ૫૨
તતઃ સ મુનિરુત્થાય કાશ્યપસ્તમુવાચ હ ।
અહો બતામિ કુશલો બુદ્ધિમાંશ્ચેતિ વિસ્મિતઃ ॥ ૫૨॥

સમવૈક્ષત તં વિપ્રો જ્ઞાનદીર્ઘેણ ચક્ષુષા ।
દદર્શ ચૈનં દેવાનાં દેવમિન્દ્રં શચીપતિમ્ ॥ ૫૩॥

તતઃ સમ્પૂજયામાસ કાશ્યપો હરિવાહનમ્ ।
અનુજ્ઞાતસ્તુ તેનાથ પ્રવિવેશ સ્વમાલયમ્ ॥  ॥ ૫૪॥

ઇતિ શ્રીમન્મહાભારતે શાન્તિપર્વણિ મોક્ષધર્મપર્વણિ
અષ્ટસપ્તત્યધિકશતતમોऽધ્યાયઃ ॥ ૧૭૮॥

Mahabharata - Shanti Parva - Chapter Footnotes

૫ રથેન રથઘાતેન । વૈશ્યઃ કશ્ચિદૃષિં દાન્તં ઇતિ
ટ। પાઠઃ ॥

૬ આત્માનં ધૈર્યં ત્યક્ત્વા ॥

૭ અકૂજન્તં મૂર્ચ્છયા નિઃશબ્દમ્ ॥

૯ શ્રોત્રિયોऽધીતદેવઃ । દોષાત્ મૌઢ્યાત્ ॥

૧૦ યત્સન્તોષણીયં રૂપં ત્વં સ્વસ્યાऽભિમન્યસેऽવમન્યસે ॥

૧૩ ન કષામ ન નાશયામ્। ૧૨-૧૭૮-૧૪ નિકષન્તિ કણ્ડૂયનેન। ।
૧૬ અધિષ્ઠાયાધ્યાસ્ય । ગાં પૃથિવીમ્। બલીવર્દાદિ વા। આત્મનિ
આત્મભોગનિમિત્તમ્ ॥

૧૭ અલ્પપ્રાણા અલ્પબલાઃ ॥

૨૦ અદન્તિ દશન્તિ ॥

૨૩ એકે દેવાદ્યાઃ । અન્યે પશ્વાદ્યાઃ ॥

૨૫ યદિ કદાચિદ્ભવેસ્તથાપિ ન તુષ્યેરિતિ યોજ્યમ્ ॥

૨૮ કામાદીનાં મૂલં બુદ્ધીન્દ્રિયગ્રામં શકુન્તાનિવ

શરીરપઞ્ચરે પરિચ્છિદ્ય નિરુધ્ય સ્થિતસ્ય ભયં નાસ્તીત્યુત્તરેણ
સમ્બન્ધઃ ॥

૩૧ વારુણ્યા મદ્યસ્ય લટ્વાખ્યપક્ષિમાસસ્ય ચ । કર્મણિ
ષષ્ઠ્યૌ। ત્વં ન સ્મરસિ બ્રાહ્મણત્વેન તવ તદ્રસગ્રહાભાવાત્ ॥

૩૨ યેષાં યાન્યભુક્તપૂર્વાણિ ॥

૩૮ અસન્તુષ્ટઃ સ્વયા વૃત્ત્યા માયાં પ્રેક્ષસ્વ યાદૃશીન્ । ઇતિ
ટઙ્ાથ। પાઠઃ ॥

૩૯ પક્ષહતાનર્ધાઙ્ગવાતાદિના નષ્ટાન્ । આમયાવિનોરોગાક્રાન્તાન્ ॥

૪૧ પ્રવાદેન કલઙ્કેન । અપહારિણા જાવિભ્રંશકરેણ ॥

૪૫ વિહારાય યથોચિતેન યજ્ઞાદિના વિહર્તુમ્ ॥

૪૮ પણ્ડિતકઃ કુત્સિતઃ પણ્ડિતઃ હેતુમદેવ વક્તા ન શ્રુતિમત્
। આક્રોષ્ટાપરુષવાક્ ॥

૪૯ સર્વશઙ્કી સ્વર્ગાદૃષ્ટાદિસદ્ભાવેઽપિ શઙ્કાવાન્ ॥

૫૪ હરિવાહનમિન્દ્રમ્ ॥

shAntiparva (12), adhyAya 178 (adhyAya number defers in the scanned file.)
httpsH//archive.org/details/in.ernet.dli.2015.345584

---

*shRRigAlagItA*

pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*